श्रीमद्गौरीरमणवपुषा श्रीशरूपेण चैकः
सत्यज्ञानामलसुखतनुस्सञ्चकास्तीश्वरो यः ।
तस्यै तस्याखिलजगदधिष्ठानभूतस्य नाम्ना-
माम्नायोक्तिप्रविततिरियं वक्ति मुक्तिप्रदत्वम् ॥ ५९॥

जिज्ञासा हि भवत्पदे बहुजनुर्यज्ञादिसाध्योदया
क्व ज्ञानं ननु दुर्लभोऽसि सुलभो विज्ञायसे चान्यतः ।
किन्नामात्र निवेदये रसनया त्वन्नाम चेत् गृह्यते
हा हन्त भ्रमणैरलं हर करग्राहं तदा गृह्यसे ॥ ६०॥

येऽनन्यास्समुपासतेऽस्मि दुरितात् गोप्तेति चाहं तव
त्रायस्वेति सकृत् प्रपत्तुरखिलत्रासं हराणीति च ।
सत्यं प्रत्यशृणोर्ददासि तु भवन्नामाक्षरग्राहिणे
सर्वस्वं शिव तावतैव जयति त्वामन्धयन्ती दया ॥ ६१॥

अप्राप्यमीक्षणमपि श्रवणं यदीय-
मन्यैस्सुरर्षिभिरपीन्दुवतंस तस्याः ।
मुक्तिश्रियः कबरिकाऽस्य कराग्रलग्ना
मुग्धोऽपि यो रसनया स्पृशति त्वदाख्याम् ॥ ६२॥

जाग्रत्युमेश तव नाम्नि पुरस्सुरद्रौ
त्यक्त्वैतदाप्तुमनसोऽन्यत इष्टसिद्धीः ।
क्षिप्त्वाऽमृतं करगतं नियतं यतन्ते
भूपांसुभिर्गमयितुं प्रशमं पिपासाम् ॥ ६३॥

एकैकमेव शुभमर्पयितुं क्षमाणि
हेत्वन्तराण्यपि च येन विना न तानि ।
श्रेयोऽखिलं दिशति यत्त्वितरानपेक्षं
तस्मिन् सतीश तव नामनि किं भयं मे ॥ ६४॥

आर्तोऽस्मीतीरणमकरुणारोपणाय त्वयि स्यात्
दासोऽस्मीति ह्यनुपधिपरित्रातृतापह्नवाय ।
सागस्कोऽस्मीत्यपि तव दुराराधतापादकं स्याद्
आतस्त्वत् संस्मृतिरलमुमाकान्त गोपायितुं नः ॥ ६५॥

महेशस्सर्वज्ञः पुरहर महादेव इति च

व्याकुर्वाणा गुणसमुदयैर्लोभनीयाश्च तास्ताः ।
श्लाघार्थानां परमपि तथा भूतये विश्वमूर्ते
व्यञ्जन्ति त्वां शिव पुनरमूस्तत्र वन्द्योऽपि च त्वम् ॥ ८९॥

मय्यत्र दोषकथनं बहुभिः किमुक्तैः
सिद्धार्थसाधनमसत्यवचो गुणोक्तैः ।
अस्मिन् वराकतिलकेऽप्यहहानुकम्पा
सम्भाव्यते शिव तवैव दयाम्बुराशेः ॥ ९०॥

आप्यायनाय च निवर्त्य निवर्तनाय
त्वय्याश्रिते शिव न तत् किमपि प्रतीमः ।
त्वं शिष्यसे पुनरखण्डसुखात्मकस्तत्
किं प्राभवं कृतधियो न जहत्यपि त्वाम् ॥ ९१॥

महिम्नामाम्नायः स्तुतिषु तव नालं पशुपते
तदस्मिन्नर्थेऽलं तनितुमधरस्पन्दमपि कः ।
तदप्याशा मेऽन्तर्वलति यदयुक्तास्फुटवचो-
निगुम्भो डिम्भोऽपि प्रदिशति मुदं चेतसि पितुः ॥ ९२॥

गौरीवल्लभ दुर्लभस्सहि लवः कारुण्यसिन्धून्मिषत्-
कल्लोलप्रसरैरभिन्नवपुषो मामस्पृशत् त्वद्दृशः ।
नो चेत् क्वायमहं क्व तावदमृतस्यन्दी भृशं दीनतो-
च्छेदी फल्गिवतरत् भवान्मम परित्रातेत्ययं प्रत्ययः ॥ ९३॥

अर्धोन्मीलन्नयनमसकृन्निर्गलद्बाष्पधारं
प्रादुर्भूताविरळपुळकं पर्युदस्तापवर्गम् ।
वामाङ्कालङ्करणगिरिजां दिव्यमूर्तिं त्वदीयां
ध्यायन्ध्यायं प्रमदजलधौ नाथ लीनः कदास्याम् ॥ ९४॥

साम्ब स्वामिन् भवदनुगुणा त्वत्प्रसादेन लब्धा
त्वत्तोऽन्यस्मिन्निह विनिहिता चापलात् केवलान्नः ।
शोभेतेयं न खलु भणितिस्सौरभास्फारभङ्गी-
क्रान्ताशान्ता कुणप इव हारोपिता पुष्पमाला ॥ ९५॥

त्वामाप्तानां भवति भगवन्नष्टधा वर्ष्म भिन्नं
ग्रीवां क्ष्वेलः स्थगयति शिरः किञ्च सिन्धुर्निरुन्धे ।
एषा तावत् भवदुपकृतिप्रक्रिया विश्रुतैव

